# Shri Bala Hridayam 2

# શ્રીબાલાહૃદયમ્ ૨

## Document Information

Text title : Shri Bala Hridayam 2

File name : bAlAhRRidayam2.itx

Category : devii, dashamahAvidyA, devI, hRidaya

Location : doc_devii

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description/comments : bAlAsaparyA saparyAkrama-nAmAvalI-stotrAdisaNgrahaH

Latest update : March 21, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

March 22, 2020

*sanskritdocuments.org*

# શ્રીબાલાહૃદયમ્ ૨

અસ્ય શ્રીબાલાદેવ્યા હૃદયમહામન્ત્રસ્ય સદાશિવઃ ઋષિઃ ।
અનુષ્ટુપ્છન્દઃ । બાલાત્રિપુરસુન્દરી દેવતા ।
ન્યાસા મૂલમન્ત્રવત્ ।
ધ્યાનમ્-
વન્દે દેવીં શિવાં બાલાં ભાસ્વન્મણ્ડલમધ્યગામ્ ।
ચચ્ચચ્ચન્દ્રાનનાં તપ્તચામીકરસમપ્રભામ્ ॥ ૧॥

નૃત્યત્ખઞ્જનેત્રસ્ય લોચનાત્યન્તવલ્લભામ્ ।
મધ્યભાગે લસત્કાઞ્ચી મણિમુક્તાવિનિર્મિતામ્ ॥ ૨॥

પદવિન્યસ્તહંસાલીં શુકનાસાવિરાજિતામ્ ।
કરિશુણ્ડોરુયુગલાં મત્તકોકિલનિઃ સ્વાનામ્ ॥ ૩॥

પુસ્તકં જપમાલાઞ્ચ વરદાભયપાણિનીમ્ ।
કુમારીવેશશોભાઢ્યાં કુમારીવૃન્દમણ્ડિતામ્ ॥ ૪॥

વિદ્રુમાધરશોભાઢ્યાં વિદ્રુમાલિનખાલિકામ્ ।
ક્કણત્કાઞ્ચીં કલાનાથસમાનરુચિરાનનામ્ ॥ ૫॥

મૃણાલબાહુલતિકાં નાનારત્નવિરાજિતામ્ ।
કરપદ્મસમાનાભાં પાદપદ્મવિરાજિતામ્ ॥ ૬॥

ચારુચામ્પેયવસનાં દેવદેવનમસ્કૃતામ્ ।
ચન્દનેન્દુવિલિપ્તાઙ્ગીં રોમરાજીવિચિત્રિતામ્ ॥ ૭॥

તિલપુષ્પસમાનાભાં નાસારત્નસમન્વિતામ્ ।
ગજગણ્ડનિતમ્બાભાં રમ્ભાજઙ્ઘાવિરાજિતામ્ ॥ ૮॥

હરવિષ્ણુમહેન્દ્રાદ્યૈઃ પૂજ્યશ્રીપાદપઙ્કજામ્ ।
કલ્યાણીં કમલાં કાલીં કુઞ્ચિકાં કમલેશ્વરીમ્ ॥ ૯॥

પાવનીં પરમાં શક્તિં પવિત્રાં પાવનીં શિવામ્ ।
ભવાનીં ભવપાશઘ્નીં ભીતિહાં ભુવનેશ્વરીમ્ ॥ ૧૦॥

ભવાનીં ભવશક્તિઞ્ચ ભેરુણ્ડાં મુણ્ડમાલિનીમ્ ।
જલન્ધરગિર્યુત્સઙ્ગાં પૂર્ણગિર્યનુરાગિણીમ્ ॥ ૧૧॥

કામરૂપાં ચ કામાખ્યાં દેવીકોટકૃતાલયામ્ ।
ઓઙ્કારપીઠનિલયાં મહામાયાં મહેશ્વરીમ્ ॥ ૧૨॥

વિશ્વેશ્વરીં ચ મધુરાં નાનારૂપાકૃતાપુરીમ્ ।
ઐં ક્લીં સૌઃ ત્ર્યક્ષરાં બાલાં તદ્વિલોમાં કુમારિકામ્ ॥ ૧૩॥

હ્યૈઃ ઐં હંસઃ નમો દેવિ ત્રિપુરાં જીવભૈરવીમ્ ।
નારદો યસ્ય દેવર્ષિઃ મહાશાન્તિફલપ્રદામ્ ॥ ૧૪॥

ૐ નમો શ્રીમહાલક્ષ્મ્યૈ લક્ષ્મીં ત્રિપુરભૈરવીમ્ ।
ૐ હ્રીં જૂં સઃ પ્રાણગ્રન્થિઃ દ્વિધાર્ગકવચદ્વયમ્ ॥ ૧૫॥

ઇયં સઞ્જીવિની દેવી મૃતાન્ જીવત્વદાયિની ।
ક્રૈઃ ક્રં ન ફ લ વ ર યૂં શ્રોં શ્રોં અમૃતમાવદેત્ ॥ ૧૬॥

સ્રાવય સ્રાવય તથા વ્રીં વ્રીં મૃત્યુઞ્જયાભિધા ।
ૐ નમો પ્રથમમાભાષ્ય કાલીબીજં દ્વિધા પઠેત્ ॥ ૧૭॥

કૂર્ચદ્વયં તથા માયા આગામિપદમાવદેત્ ।
મૃત્યું છિન્દિ તથા ભિન્દિ મહામૃત્યુઞ્જયો ભવેત્ ॥ ૧૮॥

તવ શબ્દં મમાભાષ્ય ખડ્ગેન ચ વિદારય ।
દ્વિધા ભાષ્ય મહેશાનિ તદન્તે વહ્નિસુન્દરી ॥ ૧૯॥

ઇયં દેવી મહાવિદ્યા આગામિ કાલવઞ્ચિની ।
પ્રાતર્દીપદલાકારં વાગ્ભવં રસનાતલે ॥ ૨૦॥

વિચિન્ત્ય પ્રજપેતચ્ચ મહાકવિર્ભવેદ્ધ્રુવમ્ ।
મધ્યાહ્ને કામરાજાખ્યં જપાકુસુમસન્નિભમ્ ॥ ૨૧॥

વિચિન્ત્ય હૃદિ મધ્યે તુ તચ્ચ મન્ત્રં જપેત્પ્રિયે ।
ધર્માર્થકામમોક્ષાણાં ભાજનો જાયતે ધ્રુવમ્ ॥ ૨૨॥

તાર્તીયં ચન્દ્રસઙ્કાશં સાયઙ્કાલે વિચિન્ત્ય ચ ।
પ્રજપેત્તત્ર દેવેશિ જાયતે મદનોપમઃ ॥ ૨૩॥

વાગ્ભવં કામરાજં તુ તાર્તીયં વહ્નિવલ્લભામ્ ।
અયુતં પ્રજપેન્નિત્યં આગામી કાલો વચ્ચ્યતે ॥ ૨૪॥

ત્રિકોણં ચક્રમાલિખ્ય માયાયુક્તં મહેશ્વરિ ।
તસ્યોપરિ સમાસ્તીર્ય ચાસનં રક્તવર્ણકમ્ ।
તસ્યોપરિ વિશેદ્દેવિ સાધકઃ પ્રાઙ્મુખો નિશિ ॥ ૨૬॥

ક્રમેણ પ્રજપેદ્વર્ણાન્ વાગાદિ નિયતઃ શુચિઃ ।
મણ્ડલત્રિતયે દેવિ પ્રાપ્યતે સિદ્ધિરુત્તમા ॥ ૨૭॥

નવયોન્યાત્મકં ચક્રં પૂજયેચ્છાસ્ત્રવર્ત્મના ।
પ્રજપેદ્ દ્વ્યક્ષરીં બાલાં સર્વસિદ્ધીશ્વરો ભવેત્ ॥ ૨૮॥

યં યં ચિન્તયતે કામં તં તં પ્રાપ્નોતિ સર્વશઃ ।
ઇદં તુ હૃદયં દેવિ તવાગ્રે કથિતં મયા ॥ ૨૯॥

મમ ભાગ્યં ચ સર્વસ્વં બ્રહ્માદીનાં ચ દુર્લભમ્ ।
ગોપનીયં ત્વયા ભદ્રે સ્વયોનિરિવ પાર્વતિ ॥ ૩૦॥

શતવર્તેન દેવેશિ માનુષી વશમાપ્નુયાત્ ।
સહસ્રાવર્તનાદ્દેવિ દેવા વૈ વશમાપ્નુયુઃ ॥ ૩૧॥

લક્ષમાવર્તનાદ્દેવિ શુનાસીરઃ સ્વકાસનાત્ ।
ક્ષણાચ્ચ્યવતિ તત્ર વૈ કિં પુનઃ ક્ષુદ્રજન્તવઃ ॥ ૩૨॥

તસ્માત્સર્વપ્રયત્નેન જ્ઞાત્વા દેવિ જપેન્મનુમ્ ।
સર્વસિદ્ધિમપાપ્નોતિ સર્વદા સુખવાન્ભવેત્ ॥ ૩૩॥

(જાલશમ્બરમહાતન્ત્રે)
પૂજાઙ્ગત્વેન જપકાલે મૂલમન્ત્રજપાનન્તરં વિગ્રહાદૌ મૂલમન્ત્રેણ
દેવીમાવાહ્ય યથોચિતં આવાહનાદ્યુપચારાન્ કૃત્વા પૂજાસમાપ્તૌ પુનઃ
હૃદયાદિન્યાસં ભૂર્ભુવસ્સુવરોં ઇતિ દિગ્બન્ધં ધ્યાનં લમિત્યાદિપૂજાં
કૃત્વા મૂલમન્ત્રં યથાશક્તિ જપ્ત્વા પુનઃ હૃદયાદિન્યાસં ભૂર્ભુવસ્સુવરોં
ઇતિ દિગ્વિમોકં લમિત્યાદિ પઞ્ચપૂજાં ચ કૃત્વા જપં દેવ્યગ્રે સમર્પયેત્ ।

ઇતિ શ્રીબાલાહૃદયં (૨) સમાપ્તમ્ ।

Proofread by PSA Easwaran

*Shri Bala Hridayam 2*

pdf was typeset on March 22, 2020

Please send corrections to *sanskrit@cheerful.com*